CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥श्रीगणेशायनमः॥ भद्रंकर्णेभिः शृणुयामदेवाः॥ ओं
सुशांतिः॥ हरिः ओम्॥ ओमित्येतदक्षरमिदंसर्व
तस्योपव्याख्यानं भूतंभवद्भविष्यदितिसर्वं
ओंकारएव॥ यच्चान्यत्त्रिकालातीतंतदप्योंकारएव॥
सर्वंह्येतद्ब्रह्मायमात्माब्रह्मसोयमात्माचतुष्पा
जागरितस्थानोबहिःप्रज्ञःसप्तांगएकोनविं
शतिमुखःस्थूलभुग्वैश्वानरःप्रथमपादः॥ स्व
प्नःस्थानोंतःप्रज्ञःसप्तांगएकोनविंशतिमुखः
प्रविविक्तभुक्तैजसोद्वितीयःपादः॥ यत्रसुप्तो
नकंचनकामंकामयतेनकंचनस्वप्नंपश्यति

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तत्सुषुप्तंसुषुप्तस्थानएकीभूतःप्रज्ञानघनएवा
नंदमयोह्यानंदभुक्चेतोमुखःप्राज्ञस्तृतीयःपाद॥
एषसर्वेश्वरएषसर्वज्ञएषोंतर्यामयेषयोनिःसर्व
स्यप्रभवाप्ययौहिभूतानांनांतःप्रज्ञंनबहिःप्र
ज्ञंनोभयतःप्रज्ञंनप्रज्ञानघनंनप्रज्ञंनाप्रज्ञम
दृश्यमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदे
श्यमेकात्यप्रत्ययसारंप्रपंचोपशमंशांतंशि
वमद्वैतंचतुर्थंमन्यंते॥सआत्मासविज्ञेयःसो
यमात्माध्यक्षरमोंकारोधिमात्रंपादामात्रामा
त्राश्चपादाः॥अकारउकारोमकारइतिजागरि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तस्थानोवैश्वानरोकारः प्रथमामात्रा आप्तेरादि
मत्वाद्वाआप्नोतिहवैसर्वान्कामानादिश्चभव
तियएवंवेद॥स्वप्नस्थानस्तैजसउकारोद्विती
यामात्रोत्कर्षाद्वुभयत्वाद्वोत्कर्षतिहवैज्ञानसं
ततिंसमानश्चभवतिनास्याब्रह्मवित्कुलेभ
वतियएवंवेद॥सुषुप्तस्थानःप्राज्ञोमकारस्तृ
तीयामात्रामितेरपीतेर्वामिनोतिहवाइदꣳ
सर्वमपीतिश्चभवतियएवंवेद॥अमात्रश्च
तुर्थोव्यवहार्यःप्रपंचोपशमःशिवोद्वैतएवं
ओंकारआत्मैवसंविशत्यात्मनात्मानंयएवंवेद॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भद्रंनोऽपिवातयमनः॥ शांतिः३॥ इतिमांडूक्यो
पनिषदंसमाप्तं॥ प्रथमोऽध्यायः॥ ॐ भद्रंकर्णे
भिः ॐ शांतिः३॥ द्वितीयाध्यायः॥
अलालशांतः॥

२ २

Kashi Maharani Collection, Ramnagar Fort, Varanasi